ISSN 2229 - 5577

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका

अङ्कः ४५/१-४, वि.सं. २०७१(संयुक्ताङ्कः)



अलङ्कारशास्त्रे उपमालङ्कारविवेचनम् ११२
**जितेन्द्रतिवारी**
आधुनिकसंस्कृतसाहित्ये स्त्रीणां स्थानम्-
राधावल्लभ-तारापद-दृष्ट्या ११५
**सौम्यजितसेनः**
सप्तान्नानि मेधयातपसाजनयत्पिता १२२
**रामनारायणशास्त्री**
गोपथब्राह्मणे केषांचन शब्दानां, सूक्तीनां च निदर्शनम् १३१
**किरण आर्या**
सूत्रार्थबोधे अनुवृत्तेर्वैशिष्ट्यम् १३६
**व्यासनारायणः आर्यः**
रसगङ्गाधरस्य मङ्गलश्लोकसमीक्षा १४०
**मञ्जूषा चन्ने**
कृष्णस्य प्रियतमा राधा एव १४७
**नौनिहालः गौतमः**
संस्कृतसाहित्यं प्रति गोविन्दमिश्रस्यावदानम् १५२
**खगेन्द्रपात्रः**
मेघदूते मानसूनविज्ञानम् १६०
**संदीपकुमारयादवः**
मुनिश्रीराजसुन्दरविजयेनकृत 'सुन्दरैकाक्षरकोशः' ग्रंथ समीक्षणम् १६६
**पूर्णचन्द्रोपाध्यायः**
धनिकस्य काव्यार्थचिन्तनम् १६८
**मीरा द्विवेदी**
चमत्कारसम्प्रदायः काव्यचमत्कारश्च १८३
**महेशचंद्रशर्मागौतमः**
एड्स रोगनिवारणे कामसूत्रस्य योगदानम् २०१
**श्रीकान्तआर.बाल्तिल्लायः**

किरण आर्या

# गोपथब्राह्मणे केषांचन शब्दानां, सूक्तीनां च निदर्शनम्

किरण आर्या

वैदिकवाङ्मयपरम्परायां अथर्ववेदस्य गोपथब्राह्मणं महत्त्वपूर्णं स्थानं भजते। कालक्रमेण यथा वैदिकविज्ञानधारा विलुप्ता विच्छिन्ना सती अद्यापि स्वावशेषैः कतिपयैः स्वचिरजीवितं देदीप्यमानातीतं च प्रमाणयति तस्मिन्नेव रूपे गोपथब्राह्मणस्य उपलब्धिरिदानीम् अवगमनीया। साम्प्रतं सहस्रशः दुर्लभाः ग्रन्थाः खलुनिजनामावशेषे एव जीविताः तदा गोपथब्राह्मणस्य मूलसत्ता, सौभाग्यस्पदैव। ब्राह्मणस्यास्य भाष्यानुपलब्धिं विलोक्य एतस्य ग्रन्थस्य अन्यशतपथादिब्राह्मणेन तुलनायां उपेक्षितत्वं सर्वथा दृश्यते इति तु ऋतम्। पातंजलमहाभाष्ये पस्पशाह्निके वेदानां शाखाविचारसमये 'नवधा अथर्वणः'[१] इत्युक्त्वा अथर्ववेदस्य नवशाखाः सन्तीति प्राकटयत्। एतासां सर्वासां शाखानां स्व-स्वब्राह्मणग्रन्थाः अवश्यं स्युरिति सम्भावना, परञ्चेदानीम् अथर्ववेदस्य द्वे एव शाखे समुपलभेते-शौनकशाखा, पैप्पलादशाखा च। अन्याः सप्तशाखाः विलुप्ता एव, का कथा तासाम्!! एवं च अथर्ववेदः यश्च ब्रह्मवेदनाम्नाऽप्यभिधीयते तस्य मात्रमेकं ब्राह्मणं जीवति गोपथब्राह्मणम्, तर्हि अस्योपादेयतां सुरक्षणीयतां च कः अस्वीकर्तुं प्रभवति?

गोपथब्राह्मण पैप्पलादशाखायाः विद्यत इति प्रमाणीभवति यतोहि पैप्पलादशाखायाः प्रथमो मन्त्रः 'शन्नो देवीरभिष्टय' आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः' इत्यस्ति। परं शौनकशाखायाः नास्ति अयं प्रथमो मन्त्रः। गोपथब्राह्मणे च 'शन्नो देवीरभिष्टय इत्येवमादिं कृत्वा अथर्ववेदमधीयते'[२] इति न्यगदत्, अनेन सुस्पष्टं भवति यत् पैप्लादशाखीयमिदं ब्राह्मणमिति। नैतावदेव एतदथर्ववेदस्य ब्राह्मणमिति तथ्यमपि अत्रैव वर्णनेन ज्ञायते। कतिषु स्थानेषु अथर्वोपयोगित्वस्य एतन्महनीयत्वस्य च प्रमाणार्थमनेकानि आख्यानानि सन्ति, यथा-

तान्वागभ्युवाच शंयुमाथर्वणं गच्छतेति, ते शंयुमाथर्वणमासीनं प्राप्योचुर्नमस्ते अस्तु भगवन्नश्वः शक्येतेति।[३] स इन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणतः ीत्योपातिष्ठत्तं देवा अब्रुवन्नेतद्रूपं कुरुष्व।[४]

अस्याशयः एतदेव यत् यत्कार्यं ऋग्यजुःसामवेदात् त्रिभिरेतैः न समपादयत् तत्कार्यमथर्वणा अकारि अतः अत्यन्तमुपादेयमस्य। ज्ञानकाण्डविषयदृष्ट्या ऋग्वेदे प्रायः अस्यान्तर्भावः भवति तस्मादेव प्राचीनेषु ग्रन्थेषु 'त्रयो वेदाः' एव कथनपरम्परापरिपाटी दृश्यते, प्रस्तुतेऽपि ब्राह्मणग्रन्थे कतिपयेषु स्थलेषु वेदास्त्रय इत्युदितम्-

**त्रीन् वेदान् निरमिमत। स तांस्त्रीन् वेदान् अभ्यश्राम्यत्।**[५] किन्तु एकत्र स्थले तु स्पष्टरूपेण अथर्ववेदं समेत्य वेदाश्चत्वार इति साधयति-

ऋचामग्निर्देवतन्तदेव ज्योतिर्गायत्रं छन्दःपृथिवीस्थानम्।
यजुषा वायुर्देवतं तदेव ज्योतिः त्रैष्टुभं छन्दोऽन्तरिक्षस्थानम्।
साम्नादित्यो देवतं तदेव ज्योतिर्जागतं छन्दो द्यौः सथानम्।
अथर्वणा चन्द्रमा देवतं तदेव ज्योतिः सर्वाणि छन्दांस्याप: स्थानम्।[६]

ब्राह्मणेऽस्मिन् अथर्वणमुल्लिखन् अथर्वाङ्गिरसशब्दं भूयोभूयः प्रयुङ्क्ते ब्राह्मणकारः, अनेन प्रतीयते यत् अङ्गिरसा ऋषिणा अथर्ववेदोऽयं प्रकाशित इति। अन्यब्राह्मणापेक्षया गोपथब्राह्मणमर्वाचीनमित्यपि ज्ञायते। कथं च तदिति इह उदात्तादिस्वराणां सर्वथा प्रयोगाभावः अपि च भाषायां वैदिकशब्दानां निपातानां च अभावः प्रायः विद्यते। ग्रन्थस्य भाषाशैली, वाक्यविन्यासः अपि न तावम्मनोहरः, अतो ज्ञायते यत् अस्य रचनाकालं यावत् संस्कृतभाषा स्वव्यापकत्वे न्यूनतामागमत्, एतत्सर्वमर्वाचीनत्वं द्योतयति।

इह ब्राह्मणे भागद्वयं विद्यते-पूर्वभागः उत्तरभागश्च। प्रथमे भागे पंचप्रपाठकाः सन्ति। उत्तरभागे च षट्प्रपाठकाः। ब्राह्मणमेतत् प्रमुखविषयं याज्ञिकप्रक्रियां प्रस्तौति। अथर्ववेदे आधिव्याधिनाशस्य, भैषज्यकर्मणश्च बाहुल्यं लोक्यते परं गोपथेन विषयोऽयं अस्पृश्य एव। गोपथपूर्वभागे ओ३म्शब्दस्य महिमा विस्तरेण वर्णिताऽस्ति। वर्णनेऽस्मिन् माण्डूक्योपनिषदः छान्दोग्योपनिषदश्च आश्रयः परिदृश्यते। गोपथब्राह्मणस्य वैशिष्ट्यमिदं यदिह ओ३म्शब्दे वर्णद्वयं (ओम्), चतुर्मात्राश्च प्रदर्शयति-अ, ऊ, ओ, म्। एताभिः मात्राचतसृभिः जगतः नानापदार्थाः समुत्पन्नाः। परं च माण्डूक्यादि-उपनिषत्सु त्रिमात्रभूतः (अ उ म्) ओ३म्शब्दः, इत उपदिष्टम्। सम्भवतः, स ओमित्येतदक्षरमपश्यद्द्विवर्णं चतुर्मात्रं सर्वव्यापि सर्वबिम्बयातयामब्रह्मण.... ।[७]

माण्डूक्यस्य 'सोऽयमात्मा चतुष्पात्'[८] वचनेनानेन चतुर्मात्रः ओम्शब्दः इत्यनुमतं स्यात्। गोपथब्राह्मण अस्मिन् प्रसंगे ओम्शब्दे का प्रकृतिः? इत्यादिषोडशप्रश्नाः तर्किताः, प्रत्युत्तरिताश्च, रोचकमयं तत्। तस्मिन्नेव प्रकरणे एतद् साधितं यत् मन्त्रोच्चारणवेलायां प्रतिमन्त्रात् प्राक् ओ३म्शब्द उच्चारणीयः-


अङ्क ४५/१-४, वि.सं. २०७१, ISSN : 2229-5577

'न माम् (ओम्शब्दम् अनीरयित्वा) ब्राह्मणाः ब्रह्म (वेदमन्त्रम्) वदेयुः, यदि वदेयुः अब्रह्म तत् स्यादिति।'[९]

मामिकामेव व्याहृतिमादितः कृणुध्वम् इत्येवं मामका आधीयन्ते तस्मात् ब्रह्मवादिनः ओंकारमादितः कुर्वन्ति।[१०]

द्वितीये प्रपाठक ब्रह्मचारिणः महत्त्वं कर्त्तव्यविवेचनं च वर्णयाञ्चकार गोपथर्षिः। तद्वर्णने वेदस्य ऋचः अपि प्रस्तुताः। तस्मिन्नेव प्रकरणेः गृहपत्न्या ब्रह्मचारिणे भिक्षां न दीयमाने सति तस्याः पुण्यकर्माणि, धनादीनि च नश्यन्ति इत्युल्लिलेख। अतः भिक्षा अवश्यं देया इति निर्देशस्तत्र-इष्टापूर्तसुकृतद्रविण-मवरुन्ध्यादिति, तस्मात् ब्रह्मचारिणेऽहरहर्भिक्षां दद्यात् गृहिणी।[११]

एवं च ब्रह्मचारिणः कर्तव्यव्याजेन अनेके सदुपदेशास्तत्र निर्दिष्टाः सन्ति, कतिपयेषु च स्थलेषु मांस-अभक्षणविषयोऽपि प्रस्फुटितः। ततश्च याज्ञिकी चर्चा तत्र परिदृश्यते, दर्शपौर्णमास-अग्निष्टोम-सोमयोगादयः प्रोक्ताः सन्ति। इत्थं गोपथब्राह्मणस्याध्ययनेन ज्ञायते समसामयिकाः रुचिकराश्च विषयास्तत्र वर्णितास्सन्ति अपि च जिज्ञासूनां स्वाध्यायिनां कृते तु नवीनाः-नवीनाः शब्दाः, प्रचलितानां प्रकृतिप्रत्ययात्पराणां अतः अनवगतशब्दानां च यदा तत्र व्युत्पत्तिपूर्वकमर्थः सुस्पष्टं दृश्यते तदा महान् आह्लादो भवति। निरुक्तकारमनुसृत्य गोपथब्राह्मणकारः अपि 'अर्थनित्यः परीक्षेत'[१२] इति नियमस्य समर्थकः दरीदृष्टि। यथा यास्कः वावक्ति 'अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यात् निर्ब्रूयात्, सिद्धान्तमेतत् दृढयति तथैव गोपथब्राह्मणकारः-'रूपसामान्यात् अर्थसामान्यं नेदीयः'[१३] इति ब्रूते। एतमेव नियममवलम्ब्य गोपथब्राह्मणनिर्दिष्टाः केचन ते शब्दा अत्र प्रस्तूयन्ते ये शब्दा रूढिभूताः दृश्यन्ते परं तेषामपि काचित् व्युत्पत्तिः भवितुं शक्यत इत्याश्चर्यम्, तथाहि-

'**स्वेद शब्दः**-स्वेद इति शब्दः हिन्दीभाषायां पसीना इत्यर्थे प्रयुज्यते। स स्वेदशब्दः कथं प्रादुर्भूतः इत्यस्यां जिज्ञासायां समादधाति गोपथः-सुवेदं सन्तं स्वेद इत्याचक्षते'[१४] अर्थात् सुवेदशब्देन स्वेदशब्दः निष्पन्नः। सुवेदः-यः सुष्ठुतया जानाति सः सुवेदः, स एव स्वेदः। तात्पर्य विद्यते यथा यदा कस्मिन्नपि कर्मणि शारीरिकं महच्छ्रमः विधत्ते तदा शरीरे 'पसीना' आयाति तथैव ज्ञानार्जने यदा भूयोभूयः महान् च प्रयासो भवति तस्मिन् कृते प्रयत्ने यः स्वेदः ऐति स स्वेदः तस्य परिश्रमस्य परिचायकः बोभतीति यदयं सुवेदेति। तर्हि सुवेद एव तं स्वेदं शब्दायति। इदानीं यत्किमपि कर्म कृते सति आगतं गात्रप्रक्षरणं जलं स्वेदशब्देन अभिधीयते। व्याकरणदृष्ट्या तु 'ञिष्विदा गात्रप्रक्षरणे' धातुना घञ्प्रत्यये कृते

स्वेदशब्दः गात्रप्रक्षरणेऽर्थे निर्माति परमत्र सुवेदशब्देन स्वेदशब्दसंरचना अद्भुतैव रुचियुता च।

'रथ' शब्दः-तं वा रसं सन्तं रथ इत्याचक्षते।'[१५] गोपथब्राह्मणानुसारं रथः आनन्दाय भवति, गमनागमनकाले पदातिकष्अमपवारणाय अस्योपयोगः क्रियते अतः शरीरसुखाय आनन्दाय अयम्, तस्मात् रसपूर्णत्वात् आनन्दपूर्णत्वात् अयं रथ इत्याचक्षते।

'दीक्षित शब्दः-श्रेष्ठां धियं क्षियतीति दीक्षितः'[१६] अर्थात् यः श्रेष्ठां बुद्धिं धारयति सः दीक्षितसंज्ञया उच्यते, न केवलं ब्राह्मणस्योपवाचकः दीक्षितशब्दः भवतीति।

'मख शब्दः-मख इत्येतत् यज्ञनामधेयं छिद्रप्रतिषेधसामर्थ्यात्, छिद्रं खमित्युक्त तस्य नेति प्रतिषेधः, मा यज्ञं छिद्रं करिष्यतीति'।[१७] ख इत्यस्यार्थः छिद्रम्, तस्य छिद्रस्य 'मा' शब्दद्वारा प्रतिषेधः क्रियते-मा छिद्रं (खम्)-मखः, अर्थात् छिद्रैः अथवा अशुद्धिभिः विरहितः यज्ञ एव यज्ञ उच्यते, अभिप्रायः यज्ञादिकार्ये न कदाचित् काचिद्वा त्रुटिःअशुद्धिर्वा भवितव्या।

अथर्ववेदे प्रसिद्धम् कुन्तापसूक्तम्। तस्य कुन्तापशब्दस्य व्युत्पत्तिरत्र प्रस्तौति ब्राह्मणकारः-कुयं वै कुत्सित तद्यत्तपति, तस्मात् कुन्तापः।[१८] कुय इति कुत्सितं निन्दितं (पापम्) उच्यते तं तपति नाशयति सः कुन्तापः-पापनाशकः इत्यर्थः।

एतादृशाः अनेके शब्दाः सन्ति येषां मनोहारिण्यः व्युत्पत्तयः इहावलोकयितुं शक्यते। अपि च अनेकानि सुभाषितानि अपि अमुष्मिन् ग्रन्थे प्रयुक्तानि सन्ति, रसास्वादनार्थ कानिचिदत्र प्रदर्श्यन्ते-

१. परोक्षप्रियाः इव हि देवाः भवन्ति प्रत्यक्षद्विषः[१९]-अर्थात् देवताः, ज्ञानिनः महात्मानः, सत्पुरुषाः परोक्षे सर्वेभ्यः स्निह्यति तथा प्रत्यक्षे द्विषन्ति, समक्षं तस्य स्नेहस्य प्राकाट्य न कुर्वन्ति परश्लाघाय।
२. यज्ञे अकुशला ऋत्विजो भवन्त्यचरितिनो ब्रह्मचर्यमपराग्या या तद्वै यज्ञस्य विरिष्टम् इत्याचक्षत[२०]-अर्थात् यज्ञे अकुशलाः ब्रह्मचर्यरहिताः वैराग्यरहिताः (लोभिनः) ऋत्विजः भवन्ति चेत् तद्यज्ञः नश्यति, तस्य लाभः न भवति अतः यज्ञे श्रेष्ठाः सदाचारिणः ऋत्विजः एव स्युः।
३. यथा सामपात्रम् उदक आसिक्ते निर्मृज्येत्, एवं यजमानाः निर्मृज्येरन्[२१]-यथा मृन्निर्मिते घटपात्रे धृतं जलं घटनष्टे नश्यति तथैव असदाचारिणः असत्यवादिनः यजमानाः यदि यज्ञे भागं गृह्णन्ति तर्हि ते विनश्यन्ति।
४. कुम्भे लोष्टः प्रक्षिप्तो नैव शौचार्थाय कल्पते, नैव शस्यं निर्वर्तयति[२२]-यथा कुम्भे मृल्लोष्टे क्षिप्ते सति सा मृत् न तु स्वच्छतायै भवति न च धान्यादिरोपणाय। तदभिप्रायः एषः-उपयोगि वस्तु यदि अस्थाने प्रक्षिप्यते तर्हि तस्योपयोगित्वं नश्यति।

५. एनं पूर्वे वयसि पुत्राः पितरमुपजीवति उपोत्तमे वयसि पुत्रान् पितरोपजीवन्ति य एवं वेद स वा एष संवत्सरः[२३]–अर्थात् अवस्थायाः प्रथमे भागे मातृपितृसाहाय्येन शिशूनां जीवनं चलति परं च अवस्थायाः अपरभागे पुत्राणां साहाय्येन मातृपितृणां जीवनं व्यपगच्छति। वस्तुतः वृद्धावस्थायां पित्रोः सेवा एव वास्तविकं श्राद्धम् तर्पणं च।

६. परिमितं भूतं अपरिमितं भव्यम्[२४]–भूतकालस्तु सीमित भवति परं भविष्यस्तु असीमित एव भवति। अतः गते शोको न कर्तव्यः वर्तमानं सुकृत्य भविष्यः निर्मातव्यः।

७. बृहत्या वै देवाः स्वर्गे लोके जयन्ते[२५]–बृहती वेदवाणी, बृहत्या–वेदवाण्या देवाः स्वर्गे लोके पूज्यन्ते। अतः स्वर्गकामुकाः वेदवाणीमध्येरन्।

एवं च वयं पश्यामः यत् गोपथब्राह्मण स्यातदर्वाचीनं, स्याच्च तस्य भाषाशैली अमनोहरा, परं अतीव सरलायां भाषायां तत्र सदुपदेशाः उल्लिखिताः सन्ति ये उपदेशाः अद्यतनीने समाजेऽपि ग्राह्या सन्ति। अपि च याः नवीनाः नवीनाः शब्दानां व्युत्पत्तयस्तत्र दृग्गोचरीभवन्ति तेऽपि शोधार्थिभिः शोधनीयाः विद्यन्ते। अनया दृशा गोपथोऽयं ब्राह्मणः नैव अवहेलनीयः।

**सन्दर्भाः**


१. महाभाष्ये, पृ. ४५
२. गोपथ ब्राह्मण पूर्वभागे १/२९
३. तथैव २/१८
४. तथैव २/१९
५. तथैव २/६
६. तथैव २/२९
७. तथैव १/१६
८. माण्डूकायनि उपनिषद् १/२
९. गोपथ ब्राह्मण पूर्वभागे १/२३
१०. तथैव १/२८
११. तथैव २/६
१२. निरुक्त, २/१
१३. गोपथ ब्राह्मण पूर्वभागे १/२६
१४. तथैव १/१
१५. तथैव २/२१
१६. तथैव ३/१९
१७. गोपथ ब्राह्मण उत्तरभागे, २/५
१८. गोपथ ब्राह्मण पूर्वभागे ६/१२
१९. तथैव १/१
२०. तथैव १/१३
२१. तथैव ४/१३
२२. तथैव २/२३
२३. तथैव ४/१७
२४. तथैव ५/३
२५. तथैव ४/१२



**सहायक प्राध्यापक**
संस्कृत विभाग
डॉ. हरीसिंह गौर विश्वविद्यालय, सागर (म.प्र.)


●●●